# Shripitambarisahasranamastotram

# શ્રીપીતામ્બરીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : pItAmbarIsahasranAmastotra

File name : pItAmbarIsahasranAmastotra.itx

Category : sahasranAma, devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Transliterated by : Muktabodha.org

Proofread by : Muktabodha.org, DPD

Description-comments : From Shaktapramoda kAlyAdidashamahAvidyAtantrAtmakaH

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : May 2, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 2, 2021

*sanskritdocuments.org*

# શ્રીપીતામ્બરીસહસ્રનામસ્તોત્રમ્

અથવા શ્રીબગલામુખીસહસ્રનામસ્તોત્રમ્

અથ શ્રીપીતામ્બરીસહસ્રનામસ્તોત્રમ્ ।

સુરાલયપ્રધાને તુ દેવદેવં મહેશ્વરમ્ ।
શૈલાધિરાજતનયા સઙ્ગ્રહે તમુવાચ હ ॥ ૧॥

શ્રીદેવ્યુવાચ
પરમેષ્ઠિન્પરન્ધામ પ્રધાન પરમેશ્વર ।
નામ્નાં સહસ્રમ્બગલામુખ્યાદ્યા બ્રૂહિ વલ્લભ ॥ ૨॥

ઈશ્વર ઉવાચ
શ઼ૃણુ દેવિ પ્રવક્ષ્યામિ નામધેયસહસ્રકમ્ ।
પરબ્રહ્માસ્ત્રવિદ્યાયાશ્ચતુર્વર્ગફલપ્રદમ્ ॥ ૩॥

ગુહ્યાદ્ગુહ્યતરન્દેવિ સર્વસિદ્ધૈકવન્દિતમ્ ।
અતિગુપ્તતરવિદ્યા સર્વતન્ત્રેષુ ગોપિતા ॥ ૪॥

વિશેષતઃ કલિયુગે મહાસિદ્ધ્યૌઘદાયિની ।
ગોપનીયઙ્ગોપનીયઙ્ગોપનીયમ્પ્રયત્નતઃ ॥ ૫॥

અપ્રકાશ્યમિદં સત્યં સ્વયોનિરિવ સુવ્રતે ।
રોધિની વિઘ્નસઙ્ઘાનાં મોહિની પરયોષિતામ્ ॥ ૬॥

સ્તમ્ભિની રાજસૈન્યાનાવાદિની પરવાદિનામ્ ।
પુરા ચૈકાર્ણવે ઘોરે કાલે પરમભૈરવઃ ॥ ૭॥

સુન્દરીસહિતો દેવઃ કેશવઃ ક્લેશનાશનઃ ।
ઉરગાસનમાસીનો યોગનિદ્રામુપાગમત્ ॥ ૮॥

નિદ્રાકાલે ચ તે કાલે મયા પ્રોક્તઃ સનાતનઃ ।
મહાસ્તમ્ભકરન્દેવિ સ્તોત્રવા શતનામકમ્ ॥ ૯॥

સહસ્રનામ પરમવદ દેવસ્ય કસ્યચિત્ ।

શ્રીભગવાનુવાચ

શ ृણુ શઙ્કર દેવેશ પરમાતિરહસ્યકમ્ ॥ ૧૦॥

અજોહં યત્પ્રસાદેન વિષ્ણુઃ સર્વેશ્વરેશ્વરઃ ।

ગોપનીયમ્પ્રયત્નેન પ્રકાશાત્સિદ્ધિહાનિકૃત્ ॥ ૧૧॥

ૐ અસ્ય શ્રીપીતામ્બરીસહસ્રનામસ્તોત્રમન્ત્રસ્ય ભગવાન્સદાશિવ

ઋષિરનુષ્ટુપ્છન્દશ્શ્રીજગદ્વશ્યકરી પીતામ્બરી દેવતા

સર્વાભીષ્ટસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

અથ ધ્યાનમ્

પીતામ્બરપરીધાનાં પીનોન્નતપયોધરામ્ ।

જટામુકુટશોભાઢ્યામ્પીતભૂમિસુખાસનામ્ ॥ ૧૨॥

શત્રોર્જિહ્વાં મુદ્ગરઞ્ચ બિભ્રતીમ્પરમાકુલામ્ ।

સર્વાગમપુરાણેષુ વિખ્યાતામ્ભુવનત્રયે ॥ ૧૩॥

સૃષ્ટિસ્થિતિવિનાશાનામાદિ ભૂતામહેશ્વરીમ્ ।

ગોપ્યા સર્વપ્રયત્નેન શ ृણુ તાઙ્કથયામિ તે ॥ ૧૪॥

જગદ્વિધ્વંસિનીન્દેવીમજરામરકારિણીમ્ ।

તાન્નમામિ મહામાયામહદૈશ્વર્યદાયિનીમ્ ॥ ૧૫॥

પ્રણવમ્પૂર્વમુદ્ધૃત્ય સ્થિરમાયાન્તતો વદેત્ ।

બગલામુખી સર્વેતિ દુષ્ટાનાવાચમેવ ચ ॥ ૧૬॥

મુખમ્પદં સ્તમ્ભયેતિ જિહ્વાઙ્કીલય બુદ્ધિમત્ ।

વિનાશયેતિ તારઞ્ચ સ્થિરમાયાન્તતો વદેત્ ॥ ૧૭॥

વહ્નિપ્રિયાન્તતો મન્ત્રશ્ચતુર્વર્ગફલપ્રદઃ ।

બ્રહ્માસ્ત્રમ્બ્રહ્મવિદ્યા ચ બ્રહ્મમાતા સનાતની ॥ ૧૮॥

બ્રહ્મેશી બ્રહ્મકૈવલ્યબગલા બ્રહ્મચારિણી ।

નિત્યાનન્દા નિત્યસિદ્ધા નિત્યરૂપા નિરામયા ॥ ૧૯॥

સન્ધારિણી મહામાયા કટાક્ષક્ષેમકારિણી ।

કમલા વિમલા નીલા રત્નકાન્તિગુણાશ્રિતા ॥ ૨૦॥

કામપ્રિયા કામરતા કામકામસ્વરૂપિણી ।

મઙ્ગલા વિજયા જાયા સર્વમઙ્ગલકારિણી ॥ ૨૧॥

કામિની કામિનીકામ્યા કામુકા કામચારિણી ।
કામપ્રિયા કામરતા કામાકામસ્વરૂપિણી ॥ ૨૨॥

કામાખ્યા કામબીજસ્થા કામપીઠનિવાસિની ।
કામદા કામહા કાલી કપાલી ચ કરાલિકા ॥ ૨૩॥

કંસારિઃ કમલા કામા કૈલાસેશ્વરવલ્લભા ।
કાત્યાયની કેશવા ચ કરુણા કામકેલિભુક્ ॥ ૨૪॥

ક્રિયાકીર્ત્તિઃ કૃત્તિકા ચ કાશિકા મથુરા શિવા ।
કાલાક્ષી કાલિકા કાલી ધવલાનનસુન્દરી ॥ ૨૫॥

ખેચરી ચ ખમૂર્ત્તિશ્ચ ક્ષુદ્રા ક્ષુદ્રક્ષુધાવરા ।
ખડ્ગહસ્તા ખડ્ગરતા ખડ્ગિની ખર્પરપ્રિયા ॥ ૨૬॥

ગઙ્ગા ગૌરી ગામિની ચ ગીતા ગોત્રવિવર્દ્ધિની ।
ગોધરા ગોકરા ગોધા ગન્ધર્વપુરવાસિની ॥ ૨૭॥

ગન્ધર્વા ગન્ધર્વકલા ગોપની ગરુડાસના ।
ગોવિન્દભાવા ગોવિન્દા ગાન્ધારી ગન્ધમાદિની ॥ ૨૮॥

ગૌરાઙ્ગી ગોપિકામૂર્ત્તિર્ગોપીગોષ્ઠનિવાસિની ।
ગન્ધા ગજેન્દ્રગામાન્યા ગદાધરપ્રિયા ગ્રહા ॥ ૨૯॥

ઘોરઘોરા ઘોરરૂપા ઘનશ્રોણી ઘનપ્રભા ।
દૈત્યેન્દ્રપ્રબલા ઘણ્ટાવાદિની ઘોરનિસ્સ્વના ॥ ૩૦॥

ડાકિન્યુમા ઉપેન્દ્રા ચ ઉર્વશી ઉરગાસના ।
ઉત્તમા ઉન્નતા ઉન્ના ઉત્તમસ્થાનવાસિની ॥ ૩૧॥

ચામુણ્ડા મુણ્ડિતા ચણ્ડી ચણ્ડદર્પહરેતિ ચ ।
ઉગ્રચણ્ડા ચણ્ડચણ્ડા ચણ્ડદૈત્યવિનાશિની ॥ ૩૨॥

ચણ્ડરૂપા પ્રચણ્ડા ચ ચણ્ડાચણ્ડશરીરિણી ।
ચતુર્ભુજા પ્રચણ્ડા ચ ચરાચરનિવાસિની ॥ ૩૩॥

ક્ષત્રપ્રાયશ્શિરોવાહા છલા છલતરા છલી ।
ક્ષત્રરૂપા ક્ષત્રધરા ક્ષત્રિયક્ષયકારિણી ॥ ૩૪॥

જયા ચ જયદુર્ગા ચ જયન્તી જયદા પરા ।
જાયિની જયિની જ્યોત્સ્ના જટાધરપ્રિયા જિતા ॥ ૩૫॥

જિતેન્દ્રિયા જિતક્રોધા જયમાના જનેશ્વરી ।
જિતમૃત્યુર્જરાતીતા જાહ્નવી જનકાત્મજા ॥ ૩૬॥

ઝઙ્કારા ઝઞ્ઝરી ઝણ્ટા ઝઙ્કારી ઝકશોભિની ।
ઝખા ઝમેશા ઝઙ્કારી યોનિકલ્યાણદાયિની ॥ ૩૭॥

ઝઞ્ઝરા ઝમુરી ઝારા ઝરાઝરતરા પરા ।
ઝઞ્ઝા ઝમેતા ઝઙ્કારી ઝણાકલ્યાણદાયિની ॥ ૩૮॥

ઈમના માનસી ચિન્ત્યા ઈમુના શઙ્કરપ્રિયા ।
ટઙ્કારી ટિટિકા ટીકા ટઙ્કિની ચ ટવર્ગગા ॥ ૩૯॥

ટાપા ટોપા ટટપતિષ્ટમની ટમનપ્રિયા ।
ઠકારધારિણી ઠીકા ઠઙ્કરી ઠિકરપ્રિયા ॥ ૪૦॥

ઠેકઠાસા ઠકરતી ઠામિની ઠમનપ્રિયા ।
ડારહા ડાકિની ડારા ડામરા ડમરપ્રિયા ॥ ૪૧॥

ડખિની ડડયુક્તા ચ ડમરૂકરવલ્લભા ।
ઢક્કા ઢક્કી ઢક્કનાદા ઢોલશબ્દપ્રબોધિની ॥ ૪૨॥

ઢામિની ઢામનપ્રીતા ઢગતન્ત્રપ્રકાશિની ।
અનેકરૂપિણી અમ્બા અણિમાસિદ્ધિદાયિની ॥ ૪૩॥

અમન્ત્રિણી અણુકરી અણુમદ્ભાનુસંસ્થિતા ।
તારા તન્ત્રાવતી તન્ત્રતત્ત્વરૂપા તપસ્વિની ॥ ૪૪॥

તરઙ્ગિણી તત્ત્વપરા તન્ત્રિકા તન્ત્રવિગ્રહા ।
તપોરૂપા તત્ત્વદાત્રી તપઃપ્રીતિપ્રધર્ષિણી ॥ ૪૫॥

તન્ત્રા યન્ત્રાર્ચ્ચનપરા તલાતલનિવાસિની ।
તલ્પદા ત્વલ્પદા કામ્યા સ્થિરા સ્થિરતરા સ્થિતિઃ ॥ ૪૬॥

સ્થાણુપ્રિયા સ્થપરા સ્થિતા સ્થાનપ્રદાયિની ।
દિગમ્બરા દયારૂપા દાવાગ્નિ દમનીદમા ॥ ૪૭॥

દુર્ગા દુર્ગાપરા દેવી દુષ્ટદૈત્યવિનાશિની ।
દમનપ્રમદા દૈત્યદયાદાનપરાયણા ॥ ૪૮॥

દુર્ગાર્તિનાશિની દાન્તા દમ્ભિની દમ્ભવર્જિતા ।
દિગમ્બરપ્રિયા દમ્ભા દૈત્યદમ્ભવિદારિણી ॥ ૪૯॥

દમના દશનસૌન્દર્યા દાનવેન્દ્રવિનાશિની ।
દયા ધરા ચ દમની દર્ભપત્રવિલાસિની ॥ ૫૦॥

ધરિણી ધારિણી ધાત્રી ધરાધરધરપ્રિયા ।
ધરાધરસુતા દેવી સુધર્મા ધર્મચારિણી ॥ ૫૧॥

ધર્મજ્ઞા ધવલા ધૂલા ધનદા ધનવર્દ્ધિની ।
ધીરા ધીરા ધીરતરા ધીરસિદ્ધિપ્રદાયિની ॥ ૫૨॥

ધન્વન્તરિધરાધીરા ધ્યેયા ધ્યાનસ્વરૂપિણી ।
નારાયણી નારસિંહી નિત્યાનન્દનરોત્તમા ॥ ૫૩॥

નક્તા નક્તાવતી નિત્યા નીલજીમૂતસન્નિભા ।
નીલાઙ્ગી નીલવસ્ત્રા ચ નીલપર્વતવાસિની ॥ ૫૪॥

સુનીલપુષ્પખચિતા નીલજમ્બુસમપ્રભા ।
નિત્યાખ્યા ષોડશી વિદ્યા નિત્યા નિત્યસુખાવહા ॥ ૫૫॥

નર્મદા નન્દનાનન્દા નન્દાનન્દવિવર્દ્ધિની ।
યશોદાનન્દતનયા નન્દનોદ્યાનવાસિની ॥ ૫૬॥

નાગાન્તકા નાગવૃદ્ધા નાગપત્ની ચ નાગિની ।
નમિતાશેષજનતા નમસ્કારવતી નમઃ ॥ ૫૭॥

પીતામ્બરા પાર્વતી ચ પીતામ્બરવિભૂષિતા ।
પીતમીલ્યામ્બરધરા પીતાભા પિઙ્ગમૂર્દ્ધજા ॥ ૫૮॥

પીતપુષ્પાર્ચ્ચનરતા પીતપુષ્પસમર્ચ્ચિતા ।
પરપ્રભા પિતૃપતિઃ પરસૈન્યવિનાશિની ॥ ૫૯॥

પરમા પરતન્ત્રા ચ પરમન્ત્રા પરાત્પરા ।
પરાવિદ્યા પરાસિદ્ધિઃ પરાસ્થાનપ્રદાયિની ॥ ૬૦॥

પુષ્પા પુષ્પવતી નિત્યા પુષ્પમાલાવિભૂષિતા ।
પુરાતના પૂર્વપરા પરસિદ્ધિપ્રદાયિની ॥ ૬૧॥

પીતાનિતમ્બિની પીતા પીનોન્નતપયસ્તની ।

પ્રેમાપ્રમધ્યમાશેષા પદ્મપત્રવિલાસિની ॥ ૬૨॥

પદ્માવતી પદ્મનેત્રા પદ્મા પદ્મમુખી પરા ।
પદ્માસના પદ્મપ્રિયા પદ્મરાગસ્વરૂપિણી ॥ ૬૩॥

પાવની પાલિકા પાત્રી પરદા વરદા શિવા ।
પ્રેતસંસ્થા પરાનન્દા પરબ્રહ્મસ્વરુપુણી ॥ ૬૪॥

જિનેશ્વરપ્રિયા દેવી પશુરક્તરતપ્રિયા ।
પશુમાંસપ્રિયા પર્ણા પરામૃતપરાયણા ॥ ૬૫॥

પાશીની પાશિકા ચાપિ પશુઘ્ની પશુભાષિણી ।
ફુલ્લારવિન્દવદની ફુલ્લોત્પલશરીરિણી ॥ ૬૬॥

પરાનન્દપ્રદા વીણાપશુપાશવિનાશિની ।
ફૂત્કારા ફુત્પરા ફેણી ફુલ્લેન્દીવરલોચના ॥ ૬૭॥

ફટ્મન્ત્રા સ્ફટિકા સ્વાહા સ્ફોટા ચ ફટ્સ્વરૂપિણી ।
સ્ફાટિકા ઘુટિકા ઘોરા સ્ફટિકાદ્રિસ્વરૂપિણી ॥ ૬૮॥

વરાઙ્ગના વરધરા વારાહી વાસુકી વરા ।
બિન્દુસ્થા બિન્દુની વાણી બિન્દુચક્રનિવાસિની ॥ ૬૯॥

વિદ્યાધરી વિશાલાક્ષી કાશીવાસિજનપ્રિયા ।
વેદવિદ્યા વિરૂપાક્ષી વિશ્વયુગ્બહુરૂપિણી ॥ ૭૦॥

બ્રહ્મશક્તિર્વિષ્ણુશક્તિઃ પઞ્ચવક્ત્રા શિવપ્રિયા ।
વૈકુણ્ઠવાસિની દેવી વૈકુણ્ઠપદદાયિની ॥ ૭૧॥

બ્રહ્મરૂપા વિષ્ણુરૂપા પરબ્રહ્મમહેશ્વરી ।
ભવપ્રિયા ભવોદ્ભાવા ભવરૂપા ભવોત્તમા ॥ ૭૨॥

ભવપારા ભવધારા ભાગ્યવત્પ્રિયકારિણી ।
ભદ્રા સુભદ્રા ભવદા શુમ્ભદૈત્યવિનાશિની ॥ ૭૩॥

ભવાની ભૈરવી ભીમા ભદ્રકાલી સુભદ્રિકા ।
ભગિની ભગરૂપા ચ ભગમાના ભગોત્તમા ॥ ૭૪॥

ભગપ્રિયા ભગવતી ભગવાસા ભગાકરા ।
ભગસૃષ્ટા ભાગ્યવતી ભગરૂપા ભગાસિની ॥ ૭૫॥

ભગલિઙ્ગપ્રિયા દેવી ભગલિઙ્ગપરાયણા ।
ભગલિઙ્ગસ્વરૂપા ચ ભગલિઙ્ગવિનોદિની ॥ ૭૬॥

ભગલિઙ્ગરતા દેવી ભગલિઙ્ગનિવાસિની ।
ભગમાલા ભગકલા ભગાધારા ભગામ્બરા ॥ ૭૭॥

ભગવેગા ભગાભૂષા ભગેન્દ્રા ભાગ્યરૂપિણી ।
ભગલિઙ્ગાઙ્ગસમ્ભોગા ભગલિઙ્ગાસવાવહા ॥ ૭૮॥

ભગલિઙ્ગસમાધુર્યા ભગલિઙ્ગનિવેશિતા ।
ભગલિઙ્ગસુપૂજા ચ ભગલિઙ્ગસમન્વિતા ॥ ૭૯॥

ભગલિઙ્ગવિરક્તા ચ ભગલિઙ્ગસમાવૃતા ।
માધવી માધવીમાન્યા મધુરા મધુમાનિની ॥ ૮૦॥

મન્દહાસા મહામાયા મોહિની મહદુત્તમા ।
મહામોહા મહાવિદ્યા મહાઘોરા મહાસ્મૃતિઃ ॥ ૮૧॥

મનસ્વિની માનવતી મોદિની મધુરાનના ।
મેનિકા માનિની માન્યા મણિરત્નવિભૂષણા ॥ ૮૨॥

મલ્લિકા મૌલિકા માલા માલાધરમદોત્તમા ।
મદનાસુન્દરી મેધા મધુમત્તા મધુપ્રિયા ॥ ૮૩॥

મત્તહંસાસમોન્નાસા મત્તસિંહમહાસની ।
મહેન્દ્રવલ્લભા ભીમા મૌલ્યઞ્ચ મિથુનાત્મજા ॥ ૮૪॥

મહાકાલ્યા મહાકાલી મહાબુદ્ધિર્મહોત્કટા ।
માહેશ્વરી મહામાયા મહિષાસુરઘાતિની ॥ ૮૫॥

મધુરાકીર્ત્તિમત્તા ચ મત્તમાતઙ્ગગામિની ।
મદપ્રિયા માંસરતા મત્તયુક્કામકારિણી ॥ ૮૬॥

મૈથુન્યવલ્લભા દેવી મહાનન્દા મહોત્સવા ।
મરીચિર્મારતિર્માયા મનોબુદ્ધિપ્રદાયિની ॥ ૮૭॥

મોહા મોક્ષા મહાલક્ષ્મીર્મહત્પદપ્રદાયિની ।
યમરૂપા ચ યમુના જયન્તી ચ જયપ્રદા ॥ ૮૮॥

યામ્યા યમવતી યુદ્ધા યદોઃ કુલવિવર્દ્ધિની ।
રમા રામા રામપત્ની રત્નમાલા રતિપ્રિયા ॥ ૮૯॥

રત્નસિંહાસનસ્થા ચ રત્નાભરણમણ્ડિતા ।
રમણી રમણીયા ચ રત્યારસપરાયણા ॥ ૯૦॥

રતાનન્દા રતવતી રઘૂણાકુલવર્દ્ધિની ।
રમણારિપરિભ્રાજ્યા રૈધારાધિકરત્નજા ॥ ૯૧॥

રાવી રસસ્વરૂપા ચ રાત્રિરાજસુખાવહા ।
ઋતુજા ઋતુદા ઋદ્ધા ઋતુરૂપા ઋતુપ્રિયા ॥ ૯૨॥

રક્તપ્રિયા રક્તવતી રઙ્ગિણી રક્તદન્તિકા ।
લક્ષ્મીર્લ્લજ્જા લતિકા ચ લીલાલગ્નાનિતાક્ષિણી ॥ ૯૩॥

લીલા લીલાવતી લોમાહર્ષાહ્લાદનપટ્ટિકા ।
બ્રહ્મસ્થિતા બ્રહ્મરૂપા બ્રહ્મણા વેદવન્દિતા ॥ ૯૪॥

બ્રહ્મોદ્ભવા બ્રહ્મકલા બ્રહ્માણી બ્રહ્મબોધિની ।
વેદાઙ્ગના વેદરૂપા વનિતા વિનતા વસા ॥ ૯૫॥

બાલા ચ યુવતી વૃદ્ધા બ્રહ્મકર્મપરાયણા ।
વિન્ધ્યસ્થા વિન્ધ્યવાસી ચ બિન્દુયુગ્બિન્દુભૂષણા ॥ ૯૬॥

વિદ્યાવતી વેદધારી વ્યાપિકા બર્હિણી કલા ।
વામાચારપ્રિયા વહ્નિર્વામાચારપરાયણા ॥ ૯૭॥

વામાચારરતા દેવી વામદેવપ્રિયોત્તમા ।
બુદ્ધેન્દ્રિયા વિબુદ્ધા ચ બુદ્ધાચરણમાલિની ॥ ૯૮॥

બન્ધમોચનકર્ત્રી ચ વારુણા વરુણાલયા ।
શિવા શિવપ્રિયા શુદ્ધા શુદ્ધાઙ્ગી શુક્લવર્ણિકા ॥ ૯૯॥

શુક્લપુષ્પપ્રિયા શુક્લા શિવધર્મપરાયણા ।
શુક્લસ્થા શુક્લિની શુક્લરૂપશુક્લપશુપ્રિયા ॥ ૧૦૦॥

શુક્રસ્થા શુક્રિણી શુક્રા શુક્રરૂપા ચ શુક્રિકા ।
ષણ્મુખી ચ ષડઙ્ગા ચ ષટ્ચક્રવિનિવાસિની ॥ ૧૦૧॥

ષડ્ગ્રન્થિયુક્તા ષોઢા ચ ષણ્માતા ચ ષડાત્મિકા ।
ષડઙ્ગયુવતી દેવી ષડઙ્ગપ્રકૃતિર્વશી ॥ ૧૦૨॥

ષડાનના ષડ્રસા ચ ષષ્ઠી ષષ્ઠેશ્વરીપ્રિયા ।

ષડ્ગવાદા ષોડશી ચ ષોઢાન્યાસસ્વરૂપિણી ॥ ૧૦૩ ॥

ષટ્ચક્રભેદનકરી ષટ્ચક્રસ્થસ્વરૂપિણી ।
ષોડશસ્વરરૂપા ચ ષણ્મુખી ષડ્રદાન્વિતા ॥ ૧૦૪ ॥

સનકાદિસ્વરૂપા ચ શિવધર્મષરાયણા ।
સિધ્ધા સપ્તસ્વરી શુદ્ધા સુરમાતા સ્વરોત્તમા ॥ ૧૦૫ ॥

સિધ્દવિદ્યા સિધમાતા સિધ્ધા સિધ્દસ્વરૂપિણી ।
હરા હરિપ્રિયા હારા હરિણી હારયુક્ તથા ॥ ૧૦૬ ॥

હરિરૂપા હરિધારા હરિણાક્ષી હરિપ્રિયા ।
હેતુપ્રિયા હેતુરતા હિતાહિતસ્વરૂપિણી ॥ ૧૦૭ ॥

ક્ષમા ક્ષમાવતી ક્ષીતા ક્ષુદ્રઘણ્ટાવિભૂષણા ।
ક્ષયઙ્કરી ક્ષિતીશા ચ ક્ષીણમધ્યસુશોભના ॥ ૧૦૮ ॥

અજાનન્તા અપર્ણા ચ અહલ્યાશેષશાયિની ।
સ્વાન્તર્ગતા ચ સાધૂનામન્તરાનન્તરૂપિણી ॥ ૧૦૯ ॥

અરૂપા અમલા ચાર્દ્ધા અનન્તગુણશાલિની ।
સ્વવિદ્યા વિદ્યકાવિદ્યા વિદ્યા ચાર્વિન્દલોચના ॥ ૧૧૦ ॥

અપરાજિતા જાતવેદા અજપા અમરાવતી ।
અલ્પા સ્વલ્પા અનલ્પાદ્યા અણિમાસિધ્દિદાયિની ॥ ૧૧૧ ॥

અષ્ટસિધ્દિપ્રદા દેવી રૂપલક્ષણસંયુતા ।
અરવિન્દમુખા દેવી ભોગસૌખ્યપ્રદાયિની ॥ ૧૧૨ ॥

આદિવિદ્યા આદિભૂતા આદિસિધ્દિપ્રદાયિની ।
સીત્કારરૂપિણી દેવી સર્વાસનવિભૂષિતા ॥ ૧૧૩ ॥

ઇન્દ્રપ્રિયા ચ ઇન્દ્રાણી ઇન્દ્રપ્રસ્થનિવાસિની ।
ઇન્દ્રાક્ષી ઇન્દ્રવજા ચ ઇન્દ્રમદ્યોક્ષણી તથા ॥ ૧૧૪ ॥

ઈલા કામનિવાસા ચ ઈશ્વરીશ્વરવલ્લભા ।
જનની ચેશ્વરી દીના ભેદાચેશ્વરકર્મકૃત્ ॥ ૧૧૫ ॥

ઉમા કાત્યાયની ઊર્દ્ધ્વા મીના ચોત્તરવાસિની ।
ઉમાપતિપ્રિયા દેવી શિવા ચોઙ્કારરૂપિણી ॥ ૧૧૬ ॥

ઉરગેન્દ્રશિરોરત્ના ઉરગોરગવલ્લભા ।
ઉદ્યાનવાસિની માલા પ્રશસ્તમણિભૂષણા ॥ ૧૧૭॥

ઉર્દ્ધ્વદન્તોત્તમાઙ્ગી ચ ઉત્તમા ચોર્ધ્વકેશિની ।
ઉમાસિદ્ધિપ્રદા યા ચ ઉરગાસનસંસ્થિતા ॥ ૧૧૮॥

ઋષિપુત્રી ઋષિચ્છન્દા ઋદ્ધિસિદ્ધિપ્રદાયિની ।
ઉત્સવોત્સવસીમન્તા કામિકા ચ ગુણાન્વિતા ॥ ૧૧૯॥

એલા એકારવિદ્યા ચ એણીવિદ્યાધરા તથા ।
ઓઙ્કારવલયોપેતા ઓઙ્કારપરમા કલા ॥ ૧૨૦॥

ઓંવદવદવાણી ચ ઓઙ્કારાક્ષરમણ્ડિતા ।
ઐન્દ્રી કુલિશહસ્તા ચ ઓંલોકપરવાસિની ॥ ૧૨૧॥

ઓઙ્કારમધ્યબીજા ચ ઓંનમોરૂપધારિણી ।
પ્રબ્રહ્મસ્વરૂપા ચ અંશુકાંશુકવલ્લભા ॥ ૧૨૨॥

ઓઙ્કારા અઃફડ્મન્ત્રા ચ અક્ષાક્ષરવિભૂષિતા ।
અમન્ત્રા મન્ત્રરૂપા ચ પદશોભાસમન્વિતા ॥ ૧૨૩॥

પ્રણવોઙ્કારરૂપા ચ પ્રણવોચ્ચારભાક્ પુનઃ ।
હ્રીઙ્કારરૂપા હ્રીંઙ્કારી વાગ્બીજાક્ષરભૂષણા ॥ ૧૨૪॥

હૃલ્લેખા સિદ્ધિ યોગા ચ હૃત્પદ્માસનસંસ્થિતા ।
બીજાખ્યા નેત્રહૃદયા હ્રીમ્બીજાભુવનેશ્વરી ॥ ૧૨૫॥

ક્લીઙ્કામરાજા ક્લિન્ના ચ ચતુર્વર્ગફલપ્રદા ।
ક્લીઙ્ક્લીઙ્ક્લીંરૂપિકા દેવી ક્રીઙ્ક્રીઙ્ક્રીંનામધારિણી ॥ ૧૨૬॥

કમલાશક્તિબીજા ચ પાશાઙ્કુશવિભૂષિતા ।
શ્રીંશ્રીઙ્કારા મહાવિદ્યા શ્રદ્ધા શ્રદ્ધાવતી તથા ॥ ૧૨૭॥

ઓં ઐં ક્લીંહ્રીંશ્રીમ્પરા ચ ક્લીઙ્કારી પરમા કલા ।
હ્રીઙ્ક્લીંશ્રીઙ્કારસ્વરૂપા સર્વકર્મફલપ્રદા ॥ ૧૨૮॥

સર્વાઢ્યા સર્વદેવી ચ સર્વસિદ્ધિપ્રદા તથા ।
સર્વજ્ઞા સર્વશક્તિશ્ચ વાગ્વિભૂતિપ્રદાયિની ॥ ૧૨૯॥

સર્વમોક્ષપ્રદા દેવી સર્વભોગપ્રદાયિની ।
ગુણેન્દ્રવલ્લભા વામા સર્વશક્તિપ્રદાયિની ॥ ૧૩૦॥

સર્વાનન્દમયી ચૈવ સર્વસિદ્ધિપ્રદાયિની ।
સર્વચક્રેશ્વરી દેવી સર્વસિદ્ધેશ્વરી તથા ॥ ૧૩૧॥

સર્વપ્રિયઙ્કરી ચૈવ સર્વસૌખ્યપ્રદાયિની ।
સર્વાનન્દપ્રદા દેવી બ્રહ્માનન્દપ્રદાયિની ॥ ૧૩૨॥

મનોવાઞ્છિતદાત્રી ચ મનોવૃદ્ધિસમન્વિતા ।
અકારાદિક્ષકારાન્તા દુર્ગા દુર્ગાર્ત્તિનાશિની ॥ ૧૩૩॥

પદ્મનેત્રા સુનેત્રા ચ સ્વધાસ્વાહાવષટ્કરી ।
સ્વવર્ગા દેવવર્ગા ચ તવર્ગા ચ સમન્વિતા ॥ ૧૩૪॥

અન્તસ્સ્થા વેશ્મરૂપા ચ નવદુર્ગા નરોત્તમા ।
તત્ત્વસિદ્ધિપ્રદા નીલા તથા નીલપતાકિની ॥ ૧૩૫॥

નિત્યરૂપા નિશાકારી સ્તમ્ભિની મોહિનીતિ ચ ।
વશઙ્કરી તથોચ્ચાટી ઉન્માદી કર્ષિણીતિ ચ ॥ ૧૩૬॥

માતઙ્ગી મધુમત્તા ચ અણિમા લઘિમા તથા ।
સિદ્ધા મોક્ષપ્રદા નિત્યા નિત્યાનન્દપ્રદાયિની ॥ ૧૩૭॥

રક્તાઙ્ગી રક્તનેત્રા ચ રક્તચન્દનભૂષિતા ।
સ્વલ્પસિદ્ધિસ્સુકલ્પા ચ દિવ્યચારણશુક્રભા ॥ ૧૩૮॥

સઙ્ક્રાન્તિસ્સર્વવિદ્યા ચ સસ્યવાસરભૂષિતા ।
પ્રથમા ચ દ્વિતીયા ચ તૃતીયા ચ ચતુર્થિકા ॥ ૧૩૯॥

પઞ્ચમી ચૈવ ષષ્ઠી ચ વિશુદ્ધા સપ્તમી તથા ।
અષ્ટમી નવમી ચૈવ દશમ્યેકાદશી તથા ॥ ૧૪૦॥

દ્વાદશી ત્રયોદશી ચ ચતુર્દશ્યથ પૂર્ણિમા ।
આમાવસ્યા તથા પૂર્વા ઉત્તરા પરિપૂર્ણિમા ॥ ૧૪૧॥

ખડ્ગિની ચક્રિણી ઘોરા ગદિની શૂલિની તથા ।
ભુશુણ્ડી ચાપિની બાણા સર્વાયુધવિભૂષણા ॥ ૧૪૨॥

કુલેશ્વરી કુલવતી કુલાચારપરાયણા ।
કુલકર્મસુરક્તા ચ કુલાચારપ્રવર્દ્ધિની ॥ ૧૪૩॥

કીર્તિશ્શ્રીશ્ચ રમા રામા ધર્માયૈ સતતન્નમઃ ।

ક્ષમા ધૃતિઃ સ્મૃતિર્મેધા કલ્પવૃક્ષનિવાસિની ॥ ૧૪૪॥

ઉગ્રા ઉગ્રપ્રભા ગૌરી વેદવિદ્યાવિબોધિની ।
સાધ્યા સિદ્ધા સુસિદ્ધા ચ વિપ્રરૂપા તથૈવ ચ ॥ ૧૪૫॥

કાલી કરાલી કાલ્યા ચ કલાદૈત્યવિનાશિની ।
કૌલિની કાલિકી ચૈવ ક-ચ-ટ-ત-પવર્ણિકા ॥ ૧૪૬॥

જયિની જયયુક્તા ચ જયદા જૃમ્ભિની તથા ।
સ્રાવિણી દ્રાવિણી દેવી ભરુણ્ડા વિન્ધ્યવાસિની ॥ ૧૪૭॥

જ્યોતિર્ભૂતા ચ જયદા જ્વાલામાલાસમાકુલા ।
ભિન્ના ભિન્નપ્રકાશા ચ વિભિન્ના ભિન્નરૂપિણી ॥ ૧૪૮॥

અશ્વિની ભરણી ચૈવ નક્ષત્રસમ્ભવાનિલા ।
કાશ્યપી વિનતા ખ્યાતા દિતિજાદિતિરેવ ચ ॥ ૧૪૯॥

કીર્તિઃ કામપ્રિયા દેવી કીર્ત્યા કીર્તિવિવર્દ્ધિની ।
સદ્યોમાંસસમાલબ્ધા સદ્યશ્છિન્નાસિશઙ્કરા ॥ ૧૫૦॥

દક્ષિણા ચોત્તરા પૂર્વા પશ્ચિમા દિક્ તથૈવ ચ ।
અગ્નિનૈરૃતિવાયવ્યા ઈશાન્યાદિક્ તથા સ્મૃતા ॥ ૧૫૧॥

ઊર્ધ્વાઙ્ગાધોગતા શ્વેતા કૃષ્ણા રક્તા ચ પીતકા ।
ચતુર્વર્ગા ચતુર્વર્ણા ચતુર્માત્રાત્મિકાક્ષરા ॥ ૧૫૨॥

ચતુર્મુખી ચતુર્વેદા ચતુર્વિદ્યા ચતુર્મુખા ।
ચતુર્ગણા ચતુર્માતા ચતુર્વર્ગફલપ્રદા ॥ ૧૫૩॥

ધાત્રી વિધાત્રી મિથુના નારી નાયકવાસિની ।
સુરામુદા મુદવતી મોદિની મેનકાત્મજા ॥ ૧૫૪॥

ઊર્દ્ધ્વકાલી સિદ્ધિકાલી દક્ષિણાકાલિકા શિવા ।
નીલ્યા સરસ્વતી સાત્વમ્બગલા છિન્નમસ્તકા ॥ ૧૫૫॥

સર્વેશ્વરી સિદ્ધવિદ્યા પરા પરમદેવતા ।
હિઙ્ગુલા હિઙ્ગુલાઙ્ગી ચ હિઙ્ગુલાધરવાસિની ॥ ૧૫૬॥

હિઙ્ગુલોત્તમવર્ણાભા હિઙ્ગુલાભરણા ચ સા ।
જાગ્રતી ચ જગન્માતા જગદીશ્વરવલ્લભા ॥ ૧૫૭॥

જનાર્દનપ્રિયા દેવી જયયુક્તા જયપ્રદા ।
જગદાનન્દકરી ચ જગદાહ્લાદકારિણી ॥ ૧૫૮॥

જ્ઞાનદાનકરી યજ્ઞા જાનકી જનકપ્રિયા ।
જયન્તી જયદા નિત્યા જ્વલદગ્નિસમપ્રભા ॥ ૧૫૯॥

વિદ્યાધરા ચ બિમ્બોષ્ઠી કૈલાસચલવાસિની ।
વિભવા વડવાગ્નિશ્ચ અગ્નિહોત્રફલપ્રદા ॥ ૧૬૦॥

મન્ત્રરૂપા પરા દેવી તથૈવ ગુરુરૂપિણી ।
ગયા ગઙ્ગા ગોમતી ચ પ્રભાસા પુષ્કરાપિ ચ ॥ ૧૬૧॥

વિન્ધ્યાચલરતા દેવી વિન્ધ્યાચલનિવાસિની ।
બહૂ બહુસુન્દરી ચ કંસાસુરવિનાશિની ॥ ૧૬૨॥

શૂલિની શૂલહસ્તા ચ વજ્રા વજ્રહરાપિ ચ ।
દૂર્ગા શિવા શાન્તિકરી બ્રહ્માણી બ્રાહ્મણપ્રિયા ॥ ૧૬૩॥

સર્વલોકપ્રણેત્રી ચ સર્વરોગહરાપિ ચ ।
મઙ્ગલા શોભના શુદ્ધા નિષ્કલા પરમા કલા ॥ ૧૬૪॥

વિશ્વેશ્વરી વિશ્વમાતા લલિતા વસિતાનના ।
સદાશિવા ઉમા ક્ષેમા ચણ્ડિકા ચણ્ડવિક્રમા ॥ ૧૬૫॥

સર્વદેવમયી દેવી સર્વાગમભયાપહા ।
બ્રહ્મેશવિષ્ણુનમિતા સર્વકલ્યાણકારિણી ॥ ૧૬૬॥

યોગિની યોગમાતા ચ યોગીન્દ્રહૃદયસ્થિતા ।
યોગિજાયા યોગવતી યોગીન્દ્રાનન્દયોગિની ॥ ૧૬૭॥

ઇન્દ્રાદિનમિતા દેવી ઈશ્વરી ચેશ્વરપ્રિયા ।
વિશુદ્ધિદા ભયહરા ભક્તદ્વેષિભયઙ્કરી ॥ ૧૬૮॥

ભવવેષા કામિની ચ ભરુણ્ડા ભયકારિણી ।
બલભદ્રપ્રિયાકારા સંસારાર્ણવતારિણી ॥ ૧૬૯॥

પઞ્ચભૂતા સર્વભૂતા વિભૂતિર્ભૂતિધારિણી ।
સિંહવાહા મહામોહા મોહપાશવિનાશિની ॥ ૧૭૦॥

મન્દુરા મદિરા મુદ્રા મુદ્રામુદ્ગરધારિણી ।
સાવિત્રી ચ મહાદેવી પરપ્રિયનિનાયિકા ॥ ૧૭૧॥

યમદૂતી ચ પિઙ્ગાક્ષી વૈષ્ણવી શઙ્કરી તથા ।
ચન્દ્રપ્રિયા ચન્દ્રરતા ચન્દનારણ્યવાસિની ॥ ૧૭૨॥

ચન્દનેન્દ્રસમાયુક્તા ચણ્ડદૈત્યવિનાશિની ।
સર્વેશ્વરી યક્ષિણી ચ કિરાતી રાક્ષસી તથા ॥ ૧૭૩॥

મહાભોગવતી દેવી મહામોક્ષપ્રદાયિની ।
વિશ્વહન્ત્રી વિશ્વરૂપા વિશ્વસંહારકારિણી ॥ ૧૭૪॥

ધાત્રી ચ સર્વલોકાનાં હિતકારણકામિની ।
કમલા સૂક્ષ્મદા દેવી ધાત્રી હરવિનાશિની ॥ ૧૭૫॥

સુરેન્દ્રપૂજિતા સિદ્ધા મહાતેજોવતીતિ ચ ।
પરારૂપવતી દેવી ત્રૈલોક્યાકર્ષકારિણી ॥ ૧૭૬॥

ઇતિ તે કથિતન્દેવિ પીતાનામ સહસ્રકમ્ ।
પઠેદ્વા પાઠયેદ્વાપિ સર્વસિદ્ધિર્ભવેત્પ્રિયે ॥ ૧૭૭॥

ઇતિ મે વિષ્ણુના પ્રોક્તં મહાસ્તમ્ભકરં પરમ્ ।
પ્રાતઃ કાલે ચ મધ્યાહ્ને સન્ધ્યાકાલે ચ પાર્વતિ ॥ ૧૭૮॥

એકચિત્તઃ પઠેદેતત્સર્વસિદ્ધિર્ભવિષ્યતિ ।
એકવારમ્પઠેદ્યસ્તુ સર્વપાપક્ષયો ભવેત્ ॥ ૧૭૯॥

દ્વિવારમ્પ્રપઠેદ્યસ્તુ વિઘ્નેશ્વરસમો ભવેત્ ।
ત્રિવારમ્પઠનાદ્દેવિ સર્વં સિદ્ધ્યતિ સર્વથા ॥ ૧૮૦॥

સ્તવસ્યાસ્ય પ્રભાવેણ સાક્ષાદ્ભવતિ સુવ્રતે ।
મોક્ષાર્થી લભતે મોક્ષન્ધનાર્થી લભતે ધનમ્ ॥ ૧૮૧॥

વિદ્યાર્થી લભતે વિદ્યાન્તર્કવ્યાકરણાન્વિતામ્ ।
મહિત્વવત્સરાન્તાચ્ચ શત્રુહાનિઃ પ્રજાયતે ॥ ૧૮૨॥

ક્ષોણીપતિર્વશસ્તસ્ય સ્મરણે સદૃશો ભવેત્ ।
યઃ પઠેત્સર્વદા ભક્ત્યા શ્રેયસ્તુ ભવતિ પ્રિયે ॥ ૧૮૩॥

ગણાધ્યક્ષપ્રતિનિધિઃ કવિકાવ્યપરો વરઃ ।
ગોપનીયમ્પ્રયત્નેન જનનીજારવત્સદા ॥ ૧૮૪॥

હેતુયુક્તો ભવેન્નિત્યં શક્તિયુક્તઃ સદા ભવેત્ ।

ય ઇદમ્પઠતે નિત્યં શિવેન સદૃશો ભવેત્ ॥ ૧૮૫॥

જીવન્ધર્માર્ત્થભોગી સ્યાન્મૃતો મોક્ષપતિર્ભવેત્ ।
સત્યં સત્યં મહાદેવિ સત્યં સત્યન્ન સંશયઃ ॥ ૧૮૬॥

સ્તવસ્યાસ્ય પ્રભાવેણ દેવેન સહ મોદતે ।
સુચિત્તાશ્ચ સુરાસ્સર્વે સ્તવરાજસ્ય કીર્ત્તનાત્ ॥ ૧૮૭॥

પીતામ્બરપરીધાના પીતગન્ધાનુલેપના ।
પરમોદયકીર્ત્તિઃ સ્યાત્પરતસ્સુરસુન્દરિ ॥ ૧૮૮॥

ઇતિ શ્રીઉત્કટશમ્બરે નાગેન્દ્રપ્રયાણતન્ત્રે ષોડશસહસ્રે
વિષ્ણુશઙ્કરસંવાદે પીતામ્બરીસહસ્રનામસ્તોત્રં સમાપ્તમ્ ॥

---

The original text is
from Muktabodha Indological Research Institute
www.muktabodha.org
Data-entered by the staff of Muktabodha under the direction of Mark S. G. Dyczkowski.
Reprint of edition published in 1892. Revision 0 february 9, 2009
Publisher : Shrivenkateshvara press Publication year : 1949

Reproofread by DPD

pItAmbarI is also known as bagalAmukhI

---

*Shripitambarisahasranamastotram*
pdf was typeset on May 2, 2021

Please send corrections to *sanskrit@cheerful.com*